# Shri Ganesha Stuti Naradamunikrita

# નારદમુનિકૃતા શ્રીગણેશસ્તુતિઃ

## Document Information

Text title : Shri Ganesha Stuti Naradamunikrita

File name : gaNeshastutiHnAradamunikRRitA.itx

Category : ganesha, mudgalapurANa, stuti

Location : doc_ganesha

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM dvitIyaH khaNDaH | adhyAyaH 31 | 2.31 48-65||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 5, 2024

*sanskritdocuments.org*

# નારદમુનિકૃતા શ્રીગણેશસ્તુતિઃ

॥ શ્રીગણેશાય નમઃ ॥
દેવર્ષય ઊચુઃ ।
નમો નમો ગણેશાય ગણપાલકમૂર્તયે ।
ગણરૂપેણ સર્વત્ર સંસ્થિતાય નમો નમઃ ॥ ૪૮॥
મૂષકારૂઢકાયૈવાનાદિરૂપાય તે નમઃ ।
આકારાદિવિહીનાયાકારિરૂપાય તે નમઃ ॥ ૪૯॥
હેરમ્બાય નમસ્તુભ્યં ભક્તસંરક્ષકાય ચ ।
ભક્તવત્સલભાવાય વિઘ્નેશાય નમો નમઃ ॥ ૫૦॥
નમસ્તુભ્યં સિદ્ધિપતે સિદ્ધિદાત્રે ચ ઢુણ્ઢયે ।
બુદ્ધિદાત્રે ધિયઃ પાત્રે સર્વાન્તશ્ચારિણે નમઃ ॥ ૫૧॥
સ્વાનન્દપતયે તુભ્યં સ્વસંવેદ્યાય તે નમઃ ।
યોગરૂપાય શાન્તાય યોગાનાં પતયે નમઃ ॥ ૫૨॥
આદિમધ્યાન્તહીનાય કર્ત્રે હર્ત્રે નમો નમઃ ।
પાલકાય ત્રિભિર્હીનગુણેશાય નમો નમઃ ॥ ૫૩॥
વક્રતુણ્ડાય દેવાય લમ્બોદરધરાય ચ ।
સર્વેષાં હૃદિ સંસ્થાય વિનાયક નમોઽસ્તુ તે ॥ ૫૪॥
યં સ્તોતું ન સમર્થાશ્ચ વેદાઃ સાઙ્ગાઃ કદાચન ।
વયં તત્ર ચ કે દેવ વેદૈર્જ્ઞાનધરા યતઃ ॥ ૫૫॥
એવં સ્તુત્વા ગણેશાનં પેતુસ્તે તસ્ય પાદયોઃ ।
ધૃત્વા મનસિ તદ્રૂપં ભક્તિભાવેન યન્ત્રિતાઃ ॥ ૫૬॥
પુનરુત્થાય તે સર્વે તમૂચુર્ભયવિહ્વલાઃ ।
કૃતાંઽજલિપુટા દેવં ગણેશં સર્વનાયકમ્ ॥ ૫૭॥
યદિ તુષ્ટોઽસિ દેવેશ જહિ દૈત્યં ગજાસુરમ્ ।
પદભ્રષ્ટા વયં તેન કૃતાઃ કર્મવિવર્જિતાઃ ॥ ૫૮॥
ભક્તિં તે દેહિ વિઘ્નેશ સર્વદુઃખવિનાશિનીમ્ ।

એષ એવ વરોસ્માભિર્વાઞ્છિતો દ્વિરદાનન ॥ ૫૯॥
દેવર્ષીણાં વચઃ શ્રુત્વા ભક્તવત્સલભાવતઃ ।
ઉવાચ તાન્ ગણાધ્યક્ષો હર્ષયન્ વચનં શુભમ્ ॥ ૬૦॥
ગજાસુરવધં દેવા મુનયશ્ચ સુદુષ્કરમ્ ।
તથાપિ ભવતાં વાક્યાત્ કરિષ્યેઽહં ન સંશયઃ ॥ ૬૧॥
મદીયા ભક્તિરચલા ભવિષ્યતિ સુદુર્લભા ।
પરાશરસ્ય પુત્રોઽહં ભવિષ્યામિ વધાય વૈ ॥ ૬૨॥
ભવત્કૃતમિદં સ્તોત્રં મમ પ્રીતિવિવર્ધનમ્ ।
ભુક્તિમુક્તિપ્રદં પૂર્ણં ભવિષ્યતિ ન સંશયઃ ॥ ૬૩॥
પઠતાં શૃણ્વતાં વિપ્રા દેવાઃ સર્વાર્થસિદ્ધિદમ્ ।
દુઃખઘ્નં સતતં તેષાં ભવિષ્યતિ સુબુદ્ધિદમ્ ॥ ૬૪॥
ઇત્યુક્ત્વાન્તર્દધે દેવો ગણેશઃ સર્વસિદ્ધિદઃ ।
વત્સલોદરગો ભૂત્વા પરાશરસુતોઽભવત્ ॥ ૬૫॥

ઇતિ નારદમુનિકૃતા શ્રીગણેશસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ મુદ્ગલપુરાણં દ્વિતીયઃ ખણ્ડઃ । અધ્યાયઃ ૩૧ । ૨.૩૧ ૪૮-૬૫॥

- .. mudgalapurANaM dvitIyaH khaNDaH . adhyAyaH 31 . 2.31 48-65..

Proofread by Yash Khasbage, Preeti Bhandare

*Shri Ganesha Stuti Naradamunikrita*

pdf was typeset on June 5, 2024

Please send corrections to *sanskrit@cheerful.com*